सवाप्नोति निर्व्वाणनगरं व्रजेत् । कृत्तिवासेश्वरात् प्राच्यां प्रभासात् क्षेत्रसम्भवात् । शशिभूषणसंज्ञं तु लिङ्गमत्र प्रतिष्ठितम् । तल्लिङ्गं सेवनान्मर्त्यः शशिभूषणतां व्रजेत् । प्रभासक्षेत्रयात्रायाः पुण्यं प्राप्नोति कोटिकृत् । उज्जयिन्या महाकालः स्वयमत्रागतो विभुः । यन्नामस्मरणादेव न भयं कलिकालतः । प्रणवाख्यान्महालिङ्गात् प्राच्यां कलुषनाशनम् । महाकालाभिधं लिङ्गं दर्शनान्मोक्षदं परम् । योगम्बेश्वर लिङ्गं पुष्करात्तीर्थसम्भवात् । आविरासीदिह महत् पुष्करेण सदैव तु । मतस्योदर्य्युत्तरे भागे दृष्ट्वाऽयोगम्बमुत्तमम् । स्नात्वाऽयोगम्बकुण्डे तु भवात्तारयते पितॄन् । महानादेश्वरं लिङ्गमट्टहासादिहागतम् । त्रिलोचनादुदीच्यान्तु तद्दृष्टिसंक्षये सताम् । महोत्कटेश्वरं लिङ्गं मरुत्कोटादिहागतम् । कामेश्वरोत्तरे भागे दृष्टं विमलसिद्धिदम् । विश्वस्थानादिहायातं लिङ्गं वै विमलेश्वरम् । खर्व्वीनात् पश्चिमे भागे दृष्टं विमलसिद्धिदम् । महाव्रतं महालिङ्गं महेन्द्रादिह संस्थितम् । स्कान्देश्वरसमीपे तु महाव्रतफलप्रदम् । वृन्दारकर्षिवृन्दानां स्तुवतां प्रथमे युगे । उत्पन्नं यन्महालिङ्गं भूमिं भित्त्वा सुदुर्भिदाम् । महादेवेति तैरुक्तं यन्मनोरथपूरणात् । वाराणस्यां महादेवस्तदारभ्याभवच्च यत् । मुक्तिक्षेत्रं कृतं येन महालिङ्गेन काशिका । अविमुक्ते महादेवं यो द्रक्ष्यत्यत्र मानवः । शम्भुलोके गमस्तस्य यत्र तत्र मृतस्य हि । अविमुक्ते प्रयत्नेन तत् संसेव्यं मुमुक्षुभिः । कल्पान्तरेऽपि न त्यक्तं कदाप्यानन्दकाननम् । येन लिङ्गस्वरूपेण महादेवेन सर्व्वथा । तत्प्रसादोऽयमतुलः सर्व्वरत्नमयः शुभः । हिरण्यगर्भतीर्थाच्च प्रतीच्यां क्षेत्ररक्षिका । वाराणस्यामधिष्ठात्री देवता स्वाभिलाषदा । महादेवेति संज्ञा वै सर्व्वलिङ्गस्वरूपिणी । वाराणस्यां महादेवो दृष्टो यैर्लिङ्गरूपधृक् । तेन त्रैलोक्यलिङ्गानि दृष्टानीह न संशयः । वाराणस्यां महादेवं समभ्यर्च्य नरोत्तमः । आभूतसंप्लवं यावच्छिवलोके वसेन्मुदा । पवित्रपर्व्वणि सदा श्रावणे मासि यत्नतः । लिङ्गे पवित्रमारोप्य महादेवे न गर्भभाक् । पितामहेश्वरं लिङ्गं गयातीर्थादिहागतम् । फल्गुप्रभृतिभिस्तीर्थैः सार्द्धं कोट्यष्टसम्मितैः । धर्म्मेण यत्र वै तप्तं युगानामयुतं शतम् । साक्षीकृत्य महालिङ्गं श्रीमद्धर्म्मेश्वराभिधम् । पितामहेश्वरं लिङ्गं तत्राभ्यर्च्य नरोमुदा । त्रिःसप्त-कुलसंयुक्तो मुच्यते नात्र संशयः । प्रयागतीर्थराजस्य शूलटङ्को महेश्वरः । तीर्थराजेन सहितः स्थित आगत्य वै स्वयम् । निर्व्वाणमण्डपात्रस्यादवाच्यामतिनिर्म्मलः । प्रासादो मेरुणा यस्य स्पर्द्धते काञ्चनोज्ज्वलः । देवेनैव वरो दत्तो तत्र पूर्व्वयुगान्तरे । पूज्यो महेश्वरः काश्यां प्रथमं कलुषापहः । यः प्रयाग इह स्नातो नमस्यति महेश्वरम् । समभ्यर्च्य विधानेन महासम्भारविस्तरैः । प्रयागस्नानजात् पुण्यं शूलटङ्कविलोकनात् । स प्राप्नुयान्न सन्देहः पुण्यं कोटिगुणोत्तरम् । शङ्कुकर्णान्महाक्षेत्रात् महातेज इतीरितम् । लिङ्गमाविरभूदत्र महातेजोभिवृद्धिदम् । महातेजोनिधेस्तस्य प्रासादोऽतीव निर्म्मलः । ज्वालाजटिलिताकाशो माणिक्यैरेव निर्म्मितः । तल्लिङ्गदर्शनात् स्पर्शात् स्तवनाच्च समर्च्चनात् । प्राप्यते तत् परं धाम यत्र गत्वा न शोचते । विनायकेश्वरात् पूर्व्वे महातेजःसमर्च्चनात् । तेजोमयेन यानेन याति माहेश्वरं पदम् । रुद्रकोटिसमाख्याताच्चीर्थात् परमपावनात् । महायोगेश्वरं लिङ्गमाविरासीत् स्वयं परम् । पार्व्वतीश्वरलिङ्गस्य समीपे सर्व्वसिद्धिकृत् । तल्लिङ्गदर्शनात् पुंसां कोटिलिङ्गफलं लभेत् । तत्प्रासादस्य परितो रुद्राणां कोटिसम्मिता । प्रासादरम्यसंस्थाना निर्म्मिता रुद्रमूर्त्तिभिः । काश्यां रुद्रस्थली सा तु पठ्यते वेदवादिभिः । रुद्रस्थल्यां मृता यो वै कृमिकीटपतङ्गकाः । पशुपक्षिमृगा मर्त्या म्लेच्छा वाऽप्यथ दीक्षिताः । तेषां तु रुद्रीभूतानां पुनरावृत्तिरत्र न । जन्मान्तरसहस्रेषु यत् पापं समुपार्जितम् । रुद्रस्थलीं प्रविष्टस्य तत् सर्व्वं व्रजति क्षयम् । अकामो वा सकामो वा तिर्य्यग्योनिगतोऽपि वा । रुद्रस्थल्यां त्यजन् प्राणान् परं निर्व्वाणमाप्नुयात् । स्वयमेकाम्बरात् क्षेत्रात् कृत्तिवासा इहागतः । कृत्तिवाससि लिङ्गेऽत्र स्वयमेव व्यवस्थितः । अस्मिन् लिङ्गे स्वभक्तानां साम्बः सन्निधाणो विभुः । स्वयञ्चोपदिशेद्ब्रह्म स्तुतौ स्तुतिभिरीरितम् । क्षेत्रेऽत्र सिद्धिदे प्राप्तश्चण्डीशो मरुजाङ्गलात् । प्रचण्डपापसंघातं खण्डयेच्छतधेक्षणात् । पाशपाणिगणाध्यक्षसमीपे यः प्रपश्यति । चण्डीश्वरं महालिङ्गं स याति परमां गतिम् । कालञ्जरान्नीलकण्ठस्तिष्ठेदत्र स्वयं विभुः । गणेशात् कूटदन्ताख्यात् समीपे भवनाशनः । नीलकण्ठेश्वरं लिङ्गं काश्यां यैः परिपूजितम् । नीलकण्ठास्तएव स्युस्तएव